संस्कृत

१.१.९३

तंत्र

[illegible]

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai." " Joint project of the

६१८/स्तो-७११

१

(1)

श्रीगणेशायनमः॥ॐ॥ अस्यश्रीकवचार्गलाकीलकस्तोत्रमंत्र
स्य॥ब्रह्माऋषिः॥आधारश्रीनवदुर्गादेवता॥अनुष्टुप्छंदः॥नवदु
र्गाप्रीत्यर्थंजपेविनियोगः॥ मार्कंडेयउवाच॥यद्गुह्यंपरमंलोकेसर्व
रक्षाकरंनृणां॥यन्नकस्यचिदाख्यातंतन्मेब्रूहिपितामह॥ब्रह्मोवा
च॥अस्तिगुह्यतमंविप्रसर्वभूतोपकारकं॥२॥देव्यास्तुकवचंपुण्यं
तच्छृणुष्वमहामुने॥इदंमंत्रंपठेद्यस्तुमन्नामभक्तायकदाचन॥ना
स्तिकायचदुष्टायकृतघ्नायमहामुने॥३॥कवचस्यऋषिर्ब्रह्मा
छंदोनुष्टुप्प्रकीर्तितः॥देवताश्रीमहालक्ष्मीःसर्वकामार्थसिद्ध
ये॥४॥अग्निनादह्यमानस्तुशत्रुमध्येगतोरणे॥विषयेदुर्ग
मेचैवभयार्ताःशरणंगताः॥५॥नतेषांजायतेकिंचिदशुभंर
णसंकटे॥नापदंतस्यपश्यामिशोकदुःखभयंनहि॥६॥यैस्तुभ
क्त्यास्मृतानूनंतेषांसिद्धिःप्रजायते॥प्रेतसंस्थातुचामुंडावाराही

Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai

(1A)

महिषासना ॥ ७ ॥ ब्राह्मीहंससमारूढा वैष्णवी गरुडासना ॥ मा
हेश्वरी वृषारूढा सर्वाभरणभूषिता ॥ ८ ॥ लक्ष्मीः पद्मासना देवी प
द्महस्ता हरिप्रिया ॥ श्वेतरूपधरा देवी श्वेताभरणभूषिता ॥ ९ ॥
नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥ दृश्यंते रथमारूढा दे
व्यः क्रोधसमाकुलाः ॥ १० ॥ [illegible] भेदुल्ला आयुधानि महे
श्वरः ॥ विष्णुरात्मगणाः स[illegible]यसमन्विताः ॥ ११ ॥ शंखं च
क्रं गदां शक्तिं हलं च मुसलायुधं ॥ खेटकं [illegible] तोमरं चैव परशुं पा
रमेवच ॥ १२ ॥ कुंतायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमं ॥ भिंडीमा
लाम्भशुंडी च गदा मुद्गरधारिणी ॥ १३ ॥ शक्तिपाशस्तथा खड्ग
श्च मेकं च सुशोभनं ॥ पद्मकं च त्रिशूलं च पट्टिशं महुकं तथा ॥
॥ १४ ॥ दैत्यानां देहनाशाय भक्तानामभयाय च ॥ धारयित्वा

श्रुधानीसर्वदेवानां चहितायच॥ १५॥ प्रथमंशैलपुत्री चाद्वितीयंब्र
२ स्स्चारिणी॥तृतीयंचंडघंटेति कूष्मांडेतिचतुर्थकं॥ १६॥ पंचमंस्कं
दमातेति षष्ठ्यंकात्यायनी तिच॥ सप्तमंकालरात्रिश्चमहागौरीति
चाष्टमं॥ १७॥ दुर्गाचनवमाप्रोक्तानवदुर्गाप्रकीर्तिताः॥ उक्तान्ये
तानिनामानिदेव्याः शृणुमहामुने॥ १८॥ नमस्तेस्तुमहारौद्रे
(2) महाघोरपराक्रमे॥ महाबलेमहावीर्येमहाबलविनाशिनी॥
॥ १९॥ त्राहिमांदेविदुःप्रेक्षेशत्रुणांभयवर्धिनी॥ प्राच्यांरक्ष
तुमाहेंद्री आग्नेयामग्निदेवता॥ २०॥ दक्षिणस्यांतुवाराही
नैरृत्यांखड्गधारिणी॥ प्रतीच्यांवारुणीरक्षेद्वायव्यांमृग
वाहिनी॥ २१॥ उदीच्यांरक्षेत्कौबेरीऐशान्यांशूलधारिणी॥
ऊर्ध्वंब्रह्माणिमेरक्षेदधस्ताद्वैष्णवीतथा॥ २२॥ एवंदशदिशे
२

" Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2A)

रक्षेदधस्ताद्वाराही तथा॥ जयामे चाग्रतः पातु विजयापातु
पृष्ठतः॥२३॥ अजिता वाम पार्श्वे च दक्षिणे चापराजिता॥
शिखांमे द्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता॥२४॥ माला
धरी ललाटे च भ्रुवोर्मध्ये यशस्विनी॥ त्रिनेत्रा नेत्रयोर्मध्ये
यमघंटा च नासिके॥२५॥ शंखिनी चक्षुषोर्मध्ये श्रोत्र
योर्द्वारवासिनी॥ कपोलौ कालिका रक्षेत्कर्णमूले तु शांकरी॥
॥२६॥ नासिकायां सुगंधा च उत्तरोष्ठे च चंडिका॥ अधरे
चामृतकला जिह्वायां च सरस्वती॥२७॥ दंतान्रक्षतु कौ
मारी कंठमध्ये तु चंडिका॥ घंटिकां चित्रघंटा च महामा
या च तालुके॥२८॥ कामाक्षी चुबुकं रक्षेद्वाचं मे सर्व मंग
ला॥ ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी॥२९॥ नी
लग्रीवा बहिः कंठे नलिकां नलकूबरी॥ खड्गधारिण्यु

the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "Joint project of"

३

भोस्कंधौबाहूमेवज्रधारीणी॥ ३०॥ हस्तौलुदंडीनीरक्षेदंअं
काचांगुलीस्तथा॥ हस्तांगेषुतथाचैवईतर्जन्यांकालिकास्त
३१ थां॥ मध्यमायांमहालक्ष्मीर्ध्यनामिकांसुसुंदरी॥ कनि
ष्ठिकायांतुचामुंडाकरंडादिविसंस्थिता॥ ३२॥ नखानूश
लेश्वरीरक्षेत्कुक्षौरक्षेत्नेश्वरी॥ स्तनौरक्षेन्महादेवी
मनःशोकविनाशिनी॥ ३३॥ हृदयेललितादेवीउदरेशूल
धारिणी॥ नाभौचकामिनीरक्षेद्गुह्यंगुह्येश्वरीतथा॥
॥ ३४॥ दुर्गाचमेढूंरक्षेत्कट्यांभगवतीतथा॥ पूतना
नायकामेढूंउरूमेमहिषवाहिनी॥ ३५॥ जंघेमहाबला
प्रोक्ताजानुमध्येविनायकी॥ गुल्फयोर्नारसिंहीचपा
दपृष्ठेचतेजसी॥ ३६॥ पादांगुलीश्रीधरीचपादाधस्त
लवासिनी॥ करालिनीपादनखेरोमाण्यूर्ध्वके

(3)

३

(3A)

श्विनी॥३७॥ रोमकूपाणि कौबेरी त्वचं वागेश्वरी तथा॥ रक्त
मज्जावसामांसान्यस्थिमेदांसि पार्वती॥३८॥ अंत्राणि का
लरात्रिश्च पित्तं च मुकुटेश्वरी॥ पद्मावती पद्मकोशे कफे चूडा
मणिस्तथा॥३९॥ ज्वालामुखी नखज्वालाअभेद्या: सर्वसं
धिषु॥ शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा॥४०॥
अहंकारं मनो बुद्धिं रक्षमे धर्मधारिणी॥ प्राणापानौ
तथा व्यानमुदानं च समानकं॥४१॥ वज्रहस्ता च मे रक्षेत्प्राण
कल्याणशोभने॥ रसे रूपे च गंधे च शब्दे स्पर्शे च योगिनी॥
४२॥ सत्वं रजस्तमश्चैव रक्षेन्नारायणी मम॥ आयुर्मे र
क्षतु वाराही धर्मं रक्षतु वैष्णवी॥४३॥ यशः कीर्तिं च लक्ष्मी
च सदा रक्षतु मानवः॥ गोत्रमिंद्राणि मे रक्षेत्पशून्मे रक्ष
चंडिके॥४४॥ पुत्रान्रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भै

४

रवी॥धनेश्वरी धनं रक्षेत्कौमारी कन्यकास्तथा॥४५॥मा
र्गं क्षेमकरी रक्षेद्विजया सर्वतः स्थिता॥सर्वरक्षाकरं पुण्यं
कवचं सर्वदा जपेत्॥४६॥रक्षाहीनं तु यत्स्थानं वर्जितं कव
चेन तु॥तत्सर्वं रक्ष मे देवी जयंती पापनाशिनी॥४७॥
इदं रहस्यं परमं भक्त्यानग मयोदितं॥पदमेकं न गच्छेत्तु क
वचेन विना नरः॥४८॥कवचेनावृतो नित्यं यत्र यत्राधि

(५)

गच्छति॥तत्र तत्रार्थलाभश्च विजयः सर्वकामिकः॥४९॥
यं यं चिंतयते कामं तं तं प्राप्नोति निश्चलं॥परमैश्वर्यमतु
लं प्राप्नोति विपुलं पुमान्॥५०॥निर्भयो जायते मर्त्यः
संग्रामेष्वपराजितः॥त्रैलोक्ये तु भवेत्पूज्यः कवचेना
वृतः पुमान्॥५१॥इदं तु देव्याः कवचं देवानामपि दु
र्लभं॥यः पठेत्प्रयतो नित्यं त्रिसंध्यं श्रद्धयान्वितः॥५२॥

७

देवीकलाभवेत्तस्यत्रैलोक्येष्वपराजितः॥जीवेद्वर्षशतंसा
ग्रमपमृत्युविवर्जितः॥५३॥नश्यंतिव्याधयःसर्वेलूता
विस्फोटकादयः॥स्थावरंजंगमंचापिकृत्रिमंचापियद्वि
षं॥५४॥अभिचाराणिसर्वाणिमंत्रयंत्राणिभूतले॥
भूचराःखेचराश्चैवजलजाश्चोपदेशिकाः॥५५॥सह
जाःकुलजामालाडाकिनीशाकिनीतथा॥अंतरिक्षचराघो
राडाकिन्यश्चमहाबलाः॥५६॥ग्रहभूतपिशाचाश्चयक्ष
गंधर्वराक्षसाः॥ब्रह्मराक्षसवेतालाःकूष्मांडाभैरवादयः॥५७॥
नश्यंतिदर्शनात्तस्यकवचेहृदिसंस्थिते॥मानोन्नतिर्भवे
द्राज्ञांतेजोवृद्धिकरंपरं॥५८॥यशसावर्धतेसोपिकीर्ति
मंडितभूतले॥तस्माज्जपेत्सदाभक्त्याकवचंकामदंमु
ने॥५९॥जपेत्सप्तशतींचंडींकृत्वातुकवचमादितः॥या

वसुमंडले धन्ने सशैलवनकाननं।। ६० ।। तावत्तिष्ठति मेदिन्यां
५ संततिः पुत्रपौत्रिकी।। देहांते परमं स्थानं यत्सुरैरपि दुर्लभं।।
।। ६१ ।। प्राप्नोति पुरुषं नित्यं महामायाप्रसादतः।। बंधुम
द्भाग्यरक्षित्वं भिक्षवत्सरवैरपि।। ६२ ।। गोपनीयं प्रयत्नेन
सर्वतास्मकस्वमिच्छया।। ।। इति हरिहरब्रह्माविरचितं दे
(5) व्याः कवचं संपूर्णं।। ।। मार्कंडेय उवाच।। ।। जयंती
मंगला काली भद्रकाली कपालिनी।। शिवा दुर्गा क्षमा धा
त्री स्वाहा स्वधा नमोस्तुते।। १ ।। मधुकैटभविद्रावी विधा
तृवरदे नमः।। रूपं देहि जयं देहि यशो देहि द्विषो जहि।। २ ।।
महिषासुरनिर्नाशि विधात्रि वरदे नमः।। रूपं देहि० ३ ।।
अचिंत्यरूपचरिते सर्वशत्रुविनाशिनी।। रूपं देहि० ४ ।।
वंदितांघ्रियुगे देवी देवि सौभाग्यदायिनी।। रूपं दे० ५ ।।



Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

नतेभ्यः सर्वदा भक्त्या चंडिके दुरितापहे ॥ रूपं दे० ६॥ स्तुवद्भ्यो
भक्तिपूर्वं त्वां चंडिके व्याधिनाशिनी ॥ रूपं दे हि० ७॥ चंडिके
सततं ये त्वा चर्मयंतीह भक्तितः ॥ रूपं दे हि० ८॥ देहि सौ
भाग्यमारोग्यं देहि देवि परं सुखं ॥ रूपं देहि० ९॥ विधेहि द्वि
षतां नाशं विधेहि बलमुच्चकैः ॥ रूपं देहि० १०॥ विधेहि देवि
कल्याणं विधेहि विपुलां श्रियं ॥ रूपं देहि० ११॥ सुरासुरशि
रोरत्ननिघृष्टचरणेंबिके ॥ रूपं देहि० १२॥ विद्यावंतं यशस्वं
तं लक्ष्मीवंतं जनं कुरु ॥ रूपं देहि० १३॥ प्रचंडदैत्यदर्पघ्ने चं
डिके प्रणताय मे ॥ रूपं देहि० १४॥ देवि प्रचंडदोर्दंडदैत्य
दर्पविनाशिनी ॥ रूपं देहि० १५॥ निशुंभशुंभमथिनीनि
शोधूम्राक्षमर्दिनी ॥ रूपं दे० १६॥ चंडिके सततं ये त्वा चर्म
यंतीह भक्तितः ॥ रूपं दे० १७॥ चतुर्भुजे चतुर्वक्त्रसंस्तु

नेपरमेश्वरी॥ रूपंदेहि०॥१८॥हिमाचलसुतानाथ
६ संस्तुतेपरमेश्वरी॥ रूपंदेहि०१९॥इंद्राणीपतिसद्भा
वपूजितेपरमेश्वरी॥ रूपंदेहि०२०॥देविभक्तमनोह्ला
मदृत्तानदोदृयांबिके॥ रूपंदे०२१॥पत्नींमनोरमांदेहि
(6) मनोवृत्तानुसारिणी॥ तारिणींदुर्गसंसारसागरस्यकु २
लोद्भवां॥२२॥ इदंस्तोत्रंपठित्वातुमहास्तोत्रंपठेन्नरः॥स
तुसप्तशतीसंख्यावरमाप्नोतिसंपदां॥ इत्यर्गलास्तु
तिः॥ ॥विशुद्धज्ञानदेहायत्रिवेदिदिव्यचक्षुषे॥
श्रेयप्राप्तिनिमित्तायनमः सोमार्धधारिणे॥१॥स
र्वमेवद्धिनायस्तुमंत्राणामपिकीलकं॥ सोपिक्षेममम
वाप्नोतिसततंजाप्यतत्परः॥२॥ सिद्धंत्युच्चाटनादी ६

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(६अ)

निबस्तकनिसकलान्यपि॥ एतेनवस्तुवतांदेवींस्तोत्रहंदेन
सिध्यिदा॥३॥ नमंत्रोनौषधंतत्रनकिंचिदपिविद्यते॥ वि
नाविघ्नेनसिध्यंतिसर्वमुच्चाटनादिकं॥४॥ स्तोत्रेवैचंडि
कायाश्चतच्चगुह्यंचकारसः॥ समाप्नोतिसपुण्येनतांय
थावन्नियंत्रणं॥५॥ मंत्रामाप्यपिसिध्यंतिलोकशं
कामिमांहरः॥ कृत्वा॥ मंत्रस्यामासमर्वमेतदिदंशुभं॥ ५+
कृष्णायांवाचतुर्दश्यांअष्टम्यांवासमाहितः॥ ददातिप्र
तिगृह्णातिनान्यथैषाप्रसिध्यति॥७॥ इत्थंरूपेणकी
लेनमहादेवेनकीलितं॥ योनिःकीलांविधायैनांनित्यंज
पतिसंस्फुटं॥८॥ ससिद्धःसगणःसोपिगंधर्वोजायते
विजने॥ नचैवाप्यटतस्तस्यभयंक्वापिहिजायते॥९॥
नापमृत्युवशंयातिमृतोमोक्षमवाप्नुयात्॥ ज्ञात्वा

Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(7)

प्रारभ्यकुर्वीतनत्रकुर्वाणोविनश्यति॥ १०॥ततोज्ञात्वै
वसंपंनमिदंप्रारभ्यतेबुधैः॥सौभाग्यादिचयत्किंचि
दृश्यतेललनाजने॥११॥तत्सर्वंतत्प्रसादेनजपमानस्य
जायते॥शनैस्तुजप्यमानेस्मिन्स्तोत्रेसंपत्तिरुच्चकैः॥
॥१२॥भवत्येवसमग्रापिततःप्रारभ्यमेवतत्॥ऐश्व
र्यंतत्प्रसादेनसौभाग्यारोग्यसंपदः॥१३॥शत्रुहा
निःपरोमोक्षस्तूयतेसानकिंजनैः॥सर्वेषांचैवमं
त्राणांसिद्धानांचयशस्विनां॥उर्वंयोनिःसमाख्या
तासर्वमंत्रेषुसर्वदा॥ इतिकीलकंसंपूर्णं॥ ॥ ॥
प्रथमचरित्रस्यब्रह्माऋषिः॥महाकालीदेवता
गायत्रीछंदः॥नंदाशक्तिः॥रक्तदंतिकाबीजं॥अ
ग्निस्तत्त्वं॥श्रीमहाकालीप्रीत्यर्थंजपेविनियोगः॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the ... Mumbai

(7A)

मध्यमचरित्रस्य विष्णु ऋषिः महालक्ष्मीर्देवता ॥ उष्णिक् छंदः ॥
शाकंबरी शक्तिः ॥ दुर्गा बीजं वायुस्तत्वं ॥ महालक्ष्मी प्रीत्यर्थे जपे
विनियोगः ॥ उत्तमचरित्रस्य रुद्र ऋषिः ॥ महासरस्वती देवता ॥
अनुष्टुप् छंदः ॥ भीमा शक्तिः ॥ भ्रामरी बीजं सूर्यस्तत्वं ॥ महा
सरस्वती प्रीत्यर्थे जपे विनियोगः ॥ अथ श्री चरित्रत्रयस्य
ब्रह्माविष्णुरुद्रा ऋषयः ॥ महाकाली महालक्ष्मी महासरस्व
त्यादयो देवताः ॥ गायत्र्युष्णिगनुष्टुप् छंदांसि ॥ नंदा शाकं
भरी भीमा शक्तयः ॥ रक्तदंतिका दुर्गा भ्रामर्यो बीजानि ॥ अ
ग्निर्वायु सूर्यस्तत्वानि ॥ महाकाली महालक्ष्मी सरस्वती प्री
त्यर्थे चरित्रत्रय जपे विनियोगः ॥ मार्कंडेय उवाच ॥ सावर्णिः
सूर्यतनयो यो मनुः कथ्यते ष्टमः ॥ निशामय तदुत्पत्तिं विस्त
राद्गदतो मम ॥ १ ॥ महामायानुभावेन यथा मन्वंतराधिपः ॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

८

(8)

सबभूवमहाभागःसावर्णिःस्तनयोरवेः॥२॥स्वारोचिषें
नरेपूर्वंचैत्रवंशसमुद्भवः॥सुरथोनामराजाभूत्समस्तेक्षि
तिमंडले॥३॥तस्यपालयतःसम्यक्प्रजाःपुत्रानिवोरसान्॥
बभूवुःशत्रवोभूपाःकोलाविध्वंसिनस्तदा॥४॥तस्यतैरभ
वद्युद्धमतिप्रबलदंडिनः॥न्यूनैरपिसतैर्युद्धेकोलाविध्वंसि
भिर्जितः॥५॥ततःस्वपुरमायातोनिजदेशाधिपोभवत्॥
आक्रांतःसमहाभागस्तैस्तदाप्रबलारिभिः॥६॥अमा
त्यैर्बलिभिर्दुष्टैर्दुर्बलस्यदुरात्मभिः॥कोशोबलंचापहृ
तंतत्रापिस्वपुरेततः॥७॥ततोमृगयाव्याजेनहृतस्वाम्यः
सभूपतिः॥एकाकीहयमारुह्यजगामगहनंवनं॥८॥
सतत्राश्रममद्राक्षीद्द्विजवर्यस्यमेधसः॥प्रशांतःश्वाप

८

(8A)

दाकीर्णंमुनिशिष्योपशोभितं॥९॥तस्थौकंचित्सकालंचमुनि
नातेनसत्कृतः॥इतश्चेतश्चविचरंस्तस्मिन्मुनिवराश्रमे॥१०॥
सोचिंतयत्तदातत्रममत्वाकृष्टचेतनः॥मत्पूर्वैःपालितंपूर्वं
मयाहीनंपुरंहितत्॥११॥मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतःपाल्यतेनवा॥
नजानेसप्रधानोमेशूरहस्तीसदामदः॥१२॥ममवैरिवशंयातः
कान्भोगानुपलप्स्यते॥येममानुगतानित्यंप्रसादधनभोजनैः॥१३॥
अनुवृत्तिंध्रुवंतेद्यकुर्वंत्यन्यमहीभृतां॥असम्यग्व्ययशीलैस्तैः
कुर्वद्भिःसततंव्ययं॥१४॥संचितःसोतिदुःखेनक्षयंकोषोग
मिष्यति॥एतच्चान्यच्चसततंचिंतयामाससपार्थिवः॥१५॥ ॥
तत्रविप्राश्रमाभ्याशेवैश्यमेकंददर्शसः॥सपृष्टस्तेनकस्त्वं
भोहेतुश्चागमनेत्रकः॥१६॥सशोकइवकस्मात्वंदुर्मनालक्ष

A joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

१ लक्ष्यसे॥इत्याकर्ण्यवचस्तस्यभूपतेःप्रणयोदितं॥१७॥प्रत्यु
वाचसतंवैश्यःप्रश्रयावनतोद्विजं॥समाधिर्नामवैश्योहमुत्पं
नोधनिनांकुले॥१८॥पुत्रदारैर्निरस्तश्चधनलोभादसाधुभिः।
विहीनश्चजनैर्दारैःपुत्रैरादायमेधनं॥१९॥वनमभ्यागतो
दुःखिनिरस्तश्चाप्तबंधुभिः॥सोहंनवेद्मिपुत्राणांकुशला
कुशलात्मिकां॥२०॥प्रवृत्तिंस्वजनानांचदाराणांचात्रसं
(९) स्थितः॥किंनुतेषांगृहेक्षेममक्षेमंकिंनुसांप्रतं॥२१॥कथंते
किंनुसद्वृत्तादुर्वृत्ताःकिंनुमेसुताः॥ राजोवाच॥यैर्निरस्तोभ
वान्लुब्धैःपुत्रदारादिभिर्धनैः॥२२॥तेषुकिंभवतःस्नेहमनुबध्ना
तिमानसं॥२३॥वैश्यउवाच॥एवमेतद्यथाप्राहभवानस्म
द्गतंवचः॥किंकरोमिनबध्नातिममनिष्ठुरतांमनः॥२४॥यैः

१

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan Pratishthan, Mumbai

(9a)

संत्यज्यापितस्येदंधनलुब्धैर्निराकृतः॥पत्निःस्वजनहार्दंचहार्दिति
ष्ठत्येवमेमनः॥२४॥किमेतन्नाभिजानामिजानन्नपिमहामते॥यत्प्रे
मप्रवणंचित्तंविगुणेष्वपिबंधुषु॥२५॥तेषांकृतेमेनिश्वासोदौ
र्मनस्यंचजायते॥करोमिकिंयन्नमनस्तेष्वप्रीतिषुनिष्ठुरं॥२६॥
मार्कंडेयउवाच॥ ततस्तौसहितौविप्रतंमुनिंसमुपस्थितौ॥समा
धिर्नामवैश्योसौसचपार्थिवसत्तमः॥२७॥कृत्वातुतौयथान्या
यंयथार्हंतेनसंविदं॥उपविष्टौकथाःकाश्चिच्चक्रतुर्वैश्यपार्थि
वौ॥२८॥राजोवाच॥भगवंस्त्वामहंप्रष्टुमिच्छाम्येकंवदस्वतत्॥
दुःखाययन्मेमनसःस्वचित्तायत्ततांविना॥२९॥ममत्वंममरा
ज्यस्यराज्यांगेष्वखिलेष्वपि॥जानतोपियथाज्ञस्यकिमेतन्मुनि
सत्तम॥३०॥अयंचनिःकृतःपुत्रैर्दारैर्भृत्यैस्तथोज्झितः॥स्वज
नेनचसंत्यक्तस्तेषुहार्दीतथाप्यति॥३१॥एवमेषतथाहंच

the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

द्वावप्यत्यंतदुःखितौ ॥ दृष्टदोषेपि विषये ममत्वाकृष्टमानसौ ॥
१० ३२ ॥ तत्किमेतन्महाभाग्य यन्मोहो ज्ञानिनोरपि ॥ ममास्य च भव
त्येषा विवेकांधस्य मूढता ॥ ३३ ॥ ऋषिरुवाच ॥ दिवांधाः प्रा
णिनः केचिद्रात्रावंधास्तथापरे ॥ केचिद्दिवा तथा रात्रौ प्राणि
नस्तुल्यदृष्टयः ॥ ३४ ॥ ज्ञानमस्ति समस्तस्य जंतोर्विषय
(10) गोचरे ॥ विषयश्च महाभाग याति चैवं पृथक् पृथक् ॥ ३५ ॥
ज्ञानिनो मनुजाः सत्यं किंतु ते न हि केवलं ॥ यतो हि ज्ञानिनः
सर्वे पशुपक्षिमृगादयः ॥ ३६ ॥ ज्ञानं च तन्मनुष्याणां यत्तेषां
मृगपक्षिणां ॥ मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ।
३७ ॥ ज्ञानेपि सति पश्यैतान्पतंगाञ्छावचंचुषु ॥ कणमोक्षा
दृतान्मोहात्पीड्यमानानपि क्षुधा ॥ ३८ ॥ मानुषा मनुजव्या

प्रसाभिलाषाः सुतान्प्रति॥ लोभात्प्रत्युपकाराय नन्वेते किं न पश्य
सि॥३९॥ तथापि ममतावर्ते मोहगर्ते निपातिताः॥ महामायाप्रभा
वेण संसारस्थितिकारिणा॥४०॥ तन्नात्र विस्मयः कार्यो योगनिद्रा
जगत्पतेः॥ महामाया हरेश्चैषा तया संमोह्यते जगत्॥४१॥ ज्ञा
निनामपि चेतांसि देवी भगवती हि सा॥ बलादाकृष्य मोहाय महा
माया प्रयच्छति॥४२॥ तया विसृज्यते वि
श्वं जगदेतच्चराचरं॥ सैषा प्रसन्ना वरदा नृणां भवति मुक्तये॥४३॥
सा विद्या परमा मुक्तेर्हेतुभूता सनातनी॥ संसारबंधहेतुश्च
सैव सर्वेश्वरेश्वरी॥४४॥ राजोवाच॥ भगवन्का हि सा देवी महा
मायेति यां भवान्॥ ब्रवीति कथमुत्पन्ना सा कर्मास्य किं
द्विज॥४५॥ यत्स्वभावा च सा देवी यत्स्वरूपा यदुद्भवा॥ तत्सर्वं
श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर॥४६॥ ऋषिरुवाच॥ ॥

(10A)

११॥ नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततं॥ तथापि तत्समुत्पत्तिर्बहु
धा श्रूयतां मम॥४७॥ देवानां कार्यसिध्यर्थमाविर्भवति सा यदा॥
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते॥४८॥ योगनिद्रां यदा
विष्णुर्जगत्येकार्णवीकृते॥ आस्तीर्य शेषमभजत्कल्पांते भगवा
न्प्रभुः॥४९॥ तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ॥ विष्णुक
(11) र्णमलोद्भूतौ हंतुं ब्रह्माणमुद्यतौ॥५०॥ स नाभिकमले विष्णोः स्थि
तो ब्रह्मा प्रजापतिः॥ दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनं॥
॥५१॥ तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः॥ विबोधनार्था
य हरेर्हरिनेत्रकृतालयां॥५२॥ विश्वेश्वरीं जगद्धात्रीं स्थितिसं
हारकारिणीं॥ निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः॥५३॥
ब्रह्मोवाच॥ त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारस्वरात्मिका॥
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता॥५४॥ अर्ध

(11A)

मात्रा स्थिता नित्या यानुच्चार्या विशेषतः ॥ त्वमेव सा त्वं सावित्री त्वं देवि ज
ननी परा ॥ ५५ ॥ त्वयैव धार्यते सर्वं त्वयैतत्सृज्यते जगत् ॥ त्वयैतत्पा
ल्यते देवी त्वमत्स्यं ते च सर्वदा ॥ ५६ ॥ विसृष्टौ सृष्टिरूपा त्वं स्थितिरू
पा च पालने ॥ तथा संहृतिरूपांते जगतोस्य जगन्मये ॥ ५७ ॥ महावि
द्या महामाया महामेधा महास्मृतिः ॥ महामोहा च भवति महादेवी
महासुरी ॥ ५८ ॥ प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ॥ का
लरात्रिर्महारात्री मोहरात्रिश्च दारुणा ॥ ५९ ॥ त्वं श्रीस्त्वमीश्वरी
त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥ लज्जा पुष्टिस्तथा तुष्टिस्त्वं शांतिः
क्षांतिरेव च ॥ ६० ॥ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥
शंखिनी चापिनी बाणभुशुंडीपरिघायुधा ॥ ६१ ॥ सौम्या सौ
म्यतराशेषा सौम्येभ्यस्त्वतिसुंदरी ॥ परापराणां परमा त्व
मेव परमेश्वरी ॥ ६२ ॥ यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिल

Rajwade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

लात्मिके॥तस्यसर्वस्ययाशक्तिःसात्वंकिंस्तूयसेतदा॥६३॥ययात्वया
१२ जगत्स्रष्टाजगत्पात्यत्तियोजगत्॥सोपिनिद्रावशंनीतःकस्त्वांस्तोतुमिहे
श्वरः॥६४॥विष्णुःशरीरग्रहणमहमीशानएवच॥कारितास्तेयतोतस्
त्वांकःस्तोतुंशक्तिमान्भवेत्॥६५॥सात्वमित्थंप्रभावैःस्वैरुदारैर्देविसं
स्तुता॥मोहयैतौदुराधर्षावसुरौमधुकैटभौ॥६६॥प्रबोधंचजगत्स्वा
(12) मीनीयतामच्युतोलघु॥बोधश्चक्रियतामस्यहंतुमेतौमहासुरौ॥
६७॥ऋषिरुवाच॥एवंस्तुतातदादेवीतामसीतत्रवेधसा॥विष्णोः
प्रबोधनार्थायनिहंतुंमधुकैटभौ॥६८॥नेत्रास्यनासिकाबाहुहृदये
भ्यस्तथोरसः॥निर्गम्यदर्शनेतस्थौब्रह्मणोव्यक्तजन्मनः॥६९॥उत्त
स्थौचजगन्नाथस्तयामुक्तोजनार्दनः॥एकार्णवेहिशयनात्ततःसद
दृशेचैतौसो॥७०॥मधुकैटभौदुरात्मानावतिवीर्यपराक्रमौ॥क्रोधर
क्तेक्षणावत्तुंब्रह्माणंजनितोद्यमौ॥७१॥समुत्थायततस्ताभ्यां
युयुधेभगवान्हरिः॥पंचवर्षसहस्राणिबाहुप्रहरणोविभुः॥७२॥

(12A)

तावप्यतिबलोन्मत्तौमहामायाविमोहितौ॥उक्तवंतौवरोस्म
त्तोव्रियतामितिकेशवं॥७३॥श्रीभगवानुवाच॥भवेतामद्यमे
तुष्टौममवध्यावुभावपि॥किमन्येनवरेणात्रएतावद्धिवृतंमम
॥७४॥ऋषिरुवाच॥वंचिताभ्यामितितदासर्वमापोमयंज
गत्॥विलोक्यताभ्यांगदितोभगवान्कमलेक्षणः॥७५॥आवां
जहिनयत्रोर्वीसलिलेनपरिप्लुता॥ऋषिरुवाच॥तथेत्युक्त्वा
भगवताशंखचक्रगदाभृता॥७६॥कृत्वाचक्रेणवैछिन्नेजघ
नेशिरसीतयोः॥एवमेषासमुत्पन्नाब्रह्मणासंस्तुतास्व
यं॥७७॥प्रभावमस्यादेव्यास्तुभूयःशृणुवदामिते॥७८॥
इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमहात्म्येमधु
कैटभवधः॥१॥ऋषिरुवाच॥देवासुरमभूद्युद्धंपूर्णमब
दशतंपुरा॥महिषेसुराणामधिपेदेवानांचपुरंदरे॥१॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

१३ त्रासुरैर्महावीर्यैर्देवसैन्यंपराजितं॥जित्वाचसकलान्देवानि
न्द्रोऽभून्महिषासुरः॥२॥ततःपराजितादेवाःपद्मयोनिंप्रजाप
तं॥पुरस्कृत्यगतास्तत्रयत्रेशगरुडध्वजौ॥३॥यथावृत्तंतयो
स्तद्वन्महिषासुरचेष्टितं॥त्रिदशाःकथयामासुर्देवाभिभ
ववि‍स्तरं॥४॥सूर्येंद्राग्न्यनिलेंदूनांयमस्यवरुणस्यच॥
(13) अन्येषांचाधिकारान्सस्वयमेवाधितिष्ठति॥५॥स्वर्गा
न्निराकृताःसर्वेतेनदेवगणाभुवि॥विचरंतियथामर्त्या
महिषेणदुरात्मना॥६॥एतद्वःकथितंसर्वममरारिवि
चेष्टितं॥शरणंचप्रपन्नाःस्मोवधस्तस्यविचिंत्यतां॥७॥
इत्थंनिशम्यदेवानांवचांसिमधुसूदनः॥चकारकोपं
शंभुश्चभ्रुकुटीकुटिलाननौ॥८॥ततोऽतिकोपपूर्ण

(13A)

स्य चक्रिणो वदनात्ततः ॥ निश्चक्राम महत्तेजो ब्रह्मणः शंक
रस्य च ॥ ९ ॥ अन्येषां चैव देवानां शक्रादीनां शरीरतः ॥ निर्गतं
सुमहत्तेजस्तच्चैक्यं समगच्छत ॥ १० ॥ अतीव तेजसः कूटं ज्वलंत
मिव पर्वतं ॥ ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगंतरं ॥ ११ ॥ अ
तुलं तत्र तत्तेजः सर्वदेवशरीरजं ॥ एकस्थं तदभून्नारी व्याप्तलो
कत्रयं त्विषा ॥ १२ ॥ यदभूच्छांभवं तेजस्तेनाजायत तन्मुखं ॥
याम्येन चाभवन्केशा बाहवो विष्णुतेजसा ॥ १३ ॥ सौम्येन स्त
नयोर्युग्मं ॥ मध्यं चैंद्रेण चाभवत् ॥ वारुणेन च जंघोरू नि
तंबस्तेजसा भुवः ॥ १४ ॥ ब्रह्मणस्तेजसा पादौ तदंगुल्यो
र्कतेजसा ॥ वसूनां च करांगुल्यः कौबेरेण च नासिका ॥
१५ ॥ तस्यास्तु दंताः संभूताः प्राजापत्येन तेजसा ॥ नय

१४

नत्रितयं जज्ञे तथा पावकतेजसा॥ वसूनां च करासंमुत्थः १६॥
भ्रुवौ च संध्ययोस्तेजश्श्रवणावनिलस्य च॥ अन्येषां चैव दे
वानां संभवस्तेजसां शिवा॥१७॥ ततः समस्तदेवानां तेजोरा
शिसमुद्भवां॥ तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः॥
(15) शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक्॥ चक्रं च दत्त
वान्कृष्णः समुत्पाद्य स्वचक्रतः॥१९॥ शंखं च वरुणः
शक्तिं ददौ तस्यै हुताशनः॥ मारुतो दत्तवांश्चापं बाणपूर्णे
तथेषुधी॥२०॥ वज्रमिन्द्रः समुत्पाद्य कुलिशादमराधि
पः॥ ददौ तस्यै सहस्राक्षो घंटामैरावताद्गजात्॥२१॥ का
लदंडाद्यमो दंडं पाशं चांबुपतिर्ददौ॥ प्रजापतिश्चा

१४

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(15A)

समालां ददौ ब्रह्मा लोकमंडलं ॥ २२ ॥ समस्तरोपकूपेषु निजरश्मीन्दिवाकरः ॥ कालश्च ददत्तवान् खड्गं नस्याश्च वर्म च निर्मलं ॥ २३ ॥ क्षीरोदश्चामलं हारमजरे च तथांबरे ॥ चूडामणिं तथा दिव्यां कुंडले कटकानि च ॥ २४ ॥ अर्धचंद्रं तथा शुभ्रं केयूरान् सर्वबाहुषु ॥ नूपुरौ विमलौ तद्वद्‌ ग्रैवेयकमनुत्तमं ॥ २५ ॥ अंगुलीयकरत्नानि समस्तास्वंगुलीषु च ॥ विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलं ॥ २६ ॥ अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनं ॥ अम्लानपंकजां मालां शिरस्युरसि चापरां ॥ २७ ॥ अददज्जलधिस्तस्यै पंकजं चातिशोभनं ॥ हिमवान् वाहनं सिंहं रत्नानि विविधानि च ॥ २८ ॥ ददावशून्यं सुरया पानपात्रं धनाधिपः ॥ शेषश्च सर्वनागेशो महामणिविभूषितां ॥ २९ ॥ नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमां ॥

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com